**COHERENCE** – The Multidisciplinary Research Journal
Volume No: 16, Issue No: 1, Year: 2025 (January-June)
PP: 99-105
ISSN: 0976-5301
Peer Reviewed & Refereed Journal (IF: 7.85)
Journal Website www.coherencejournal.in

# व्याकरणशास्त्रे व्याकरणस्य पञ्चाङ्गता तत्र धातुपाठस्य महत्त्वम्

**डॉ. प्रकाश कुमार झा**

ग्राम+पो.- सिसवार, थाना- फुलपरास, जिला- मधुबनी

## सारांश

संस्कृतव्याकरणशास्त्रं भारतीयविद्यापरम्परायाः अत्यन्तं महत्त्वपूर्णं शास्त्रम् अस्ति। पाणिनीयव्याकरणपरम्परायां व्याकरणशास्त्रस्य सम्यगध्ययनार्थं केवलमष्टाध्याय्याः अध्ययनं पर्याप्तं न भवति, अपितु तदनुग्राहकग्रन्थानामपि ज्ञानम् अपेक्षितम्। एतेषां ग्रन्थानां समाहारः व्याकरणस्य पञ्चाङ्गता इति नाम्ना प्रसिद्धः। परम्परानुसारं सूत्रपाठः, धातुपाठः, गणपाठः, उणादिसूत्राणि तथा लिङ्गानुशासनम् इति व्याकरणस्य पञ्चाङ्गानि स्वीकृतानि सन्ति। एतेषां समन्विताध्ययनेन एव व्याकरणशास्त्रस्य पूर्णबोधः सम्भवति। अष्टाध्यायी नाम सूत्रपाठः व्याकरणशास्त्रस्य मूलाधारः अस्ति। गणपाठः शब्दसमूहानां व्यवस्थितसङ्ग्रहं प्रददाति, उणादिसूत्राणि कतिपयानां शब्दानां व्युत्पत्तिं निरूपयन्ति, लिङ्गानुशासनं नामपदानां लिङ्गनिर्णये सहायकं भवति। एतेषु सर्वेषु अङ्गेषु धातुपाठस्य स्थानं विशेषमहत्त्वपूर्णम् अस्ति, यतः धातवः शब्दनिर्माणस्य मूलाधाराः भवन्ति। धातुपाठे संस्कृतभाषायाः धातूनां सङ्ग्रहः कृतः अस्ति। तत्र धातवः भ्वाद्यादिदशगणेषु विभक्ताः सन्ति तथा तेषामेव आधारेण तिङन्तरूपाणि, कृदन्तरूपाणि, तद्धितान्तशब्दाः, समस्तपदानि च निष्पाद्यन्ते। पाणिनीयसूत्रेषु निर्दिष्टानां नियमाणां प्रयोगः धातुपाठस्य साहाय्येनैव सम्पन्नो भवति। धात्वर्थज्ञानं विना शब्दव्युत्पत्तेः, रूपसिद्धेः तथा वाक्यार्थबोधस्य सम्यगवगमनं न सम्भवति। धातुपाठः केवलं रूपनिर्माणस्य साधनं नास्ति, अपितु भाषावैज्ञानिकदृष्ट्या संस्कृतभाषायाः रचनात्मकवैशिष्ट्यस्य द्योतकः अपि अस्ति। वेदेषु, काव्येषु, पुराणेषु, दर्शनेषु च प्रयुक्तानां पदानां व्युत्पत्तिविवेचनाय धातुपाठः महदुपकारं करोति। अतः व्याकरणस्य पञ्चाङ्गेषु धातुपाठः प्राणतत्त्वरूपेण परिगण्यते।

**भूमिका:** व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति व्याकरणम्। वि आङ् सोपसर्गद्वयपूर्वकं कृ धातोः ल्युट् प्रत्ययेन व्याकरण शब्दो निष्पद्यते। अस्मिन् व्याकरणशास्त्रे पञ्चाङ्गस्योल्लेखं प्राप्यते। तस्य विवेचनमधोलिखितमस्ति।

### (क) व्याकरणस्य पञ्चाङ्गता

पञ्चानामङ्गानां समाहारः पञ्चाङ्गम्। पाणिनीयव्याकरणमेव पञ्चाङ्गत्वेन विशिष्यते। तत्र शब्दानुशासनं, धातुपाठः, गणपाठः, लिङ्गानुशासनं शिक्षा च पञ्चाङ्गानि सन्ति। केचिद् विद्वांसः शिक्षास्थाने उणादिसूत्राणि गणयन्ति, अपरे तु तत्र परिभाषापाठं स्वीकुर्वन्ति। परन्तु प्रसङ्गेऽस्मिन् प्रमाणमस्ति कश्चित् प्राचीनश्लोकः-

**अष्टकं गणपाठश्च धातुपाठस्तथैव च।**

**लिङ्गानुशासनं शिक्षा पाणिनीया अमी क्रमात्॥**


© Copyright @ Authors

ISSN: 0976-5301
Peer Reviewed & Refereed Journal (IF: 7.85)
Journal Website www.coherencejournal.in

व्याकरणशास्त्रस्येतिहासे वैयाकरणनिकाये व्याकरणस्य पूर्णताद्योतनाय पञ्चाङ्गव्याकरणमिति शब्दस्य व्यवहारो भवति। अत्रोल्लिखितेषु पञ्चाङ्गेषु शब्दानुशासनम् (सूत्रपाठः) एव मुख्यम्। अन्ये चत्वारि अङ्गानि शब्दानुशासनस्य सहायकत्वेन उपकारकत्वेन च तेन सह प्रत्यक्षसम्बद्धात्। अत एव धातुपाठस्य शब्दानुशासनातिरिक्ता हि पाणिनीयाः तत् सम्बद्धाः ग्रन्था हि खिल शब्देन अथवा परिशिष्टशब्देन व्यवह्वीयते।

यथोक्तं काशिकायाम्- उपदिश्यतेऽनेनेत्युपदेशः। शास्त्रवाक्यानि सूत्रपाठः खिलपाठश्च। तथैव न्यासे- "खिलपाठो धातुपाठश्चकारात्प्रातिपदिकपाठश्च।" खिलमेव परिशिष्टम् यथा सप्तशत्याः मूर्त्यादिरहस्ये- "मार्कण्डेयपुराणे खिलांशे मूर्तिरहस्यमिति" तथैव स्वशाखेतर अपरशाखीयं खिलमेव।

**1. धातुपाठः-** धातुपाठः व्याकरणशास्त्रे मुख्यस्थाने भजते। शब्दानां प्रकृतिप्रत्ययविभागः काल्पनिको यथार्थो वा स्यात् परन्तु शब्दानां प्रकृतिप्रत्ययविभागसाधनेन सह व्याकरणस्य सम्बद्धमस्त्यैव। तत्र प्रकृतेर्मूलं धातुः। यस्मात् प्रत्ययविधिः कल्प्यते विधीयते सा प्रकृतिः। सर्वे कृदन्त- तद्धितान्ता शब्दा एव प्रकृतिः। समस्तशब्दा धातुजाः। भूवादयः धातवो विविधानां शब्दरूपाणां धारकः। अतएव वैयाकरणनिकाये धातुलक्षणमेवं क्रियते यत्-

**"दधाति विविधं शब्दरूपं यः सः धातुः।"(1)**

बह्वः आचार्याः धातुपाठः समुद्घाटितः। तत्र इन्द्रेणाऽपि धातुपाठः कृतः अथ च वायुनापि वस्तुतस्तु आपिशलि- काशकृत्स्न-शाकटायन-भागुरि-प्रभृतिरपि स्व-सम्प्रदायानुसारी धातुपाठः समुल्लिखति आसीत्। सौभाग्यवशात् तेषु आचार्येषु काशकृत्स्नस्यैव धातुपाठ: सम्प्राप्यते।

एवं हि समुपलब्धेषु धातुपाठेषु पाणिनीयधातुपाठः अन्यतमः। केचितु तस्य पाणिनीयत्त्व प्रत्याचक्षते। तेषु न्यासकारो जिनेन्द्रबुद्धिः मुख्यः, किन्तु तेन प्रतिपादितं हि पूर्व-गणकारः पाणिनिना भवतीति। तथा चान्ये गणकारोऽन्यश्च सूत्रकार इति कथनेन गणकारशब्देन किमभीष्टमिति नैव स्पष्टं तथापि यद्यप्यत्र त्रिग्रहणं क्रियते निजादीनामन्ते वृत्करणं किमर्थम्? एतद्गणकाः प्रष्टव्याः न सूत्रकारः। अन्यः गणकारः अन्यश्च सूत्रकार इत्युक्तमेव। इति कथनेन धातुपाठस्य पाणिनीयत्वां प्रत्याख्यातं विद्यते। किन्तु स एवान्यत्र न तस्य महर्षि- पाणिनेरिव 'अस् भुवि' इति प्रतिपाद्य धातुपाठस्य पाणिन्युक्तं समर्थयति।

**2. गणपाठः-** धातुपाठः यद्यपि गणपाठ एव धातवोऽपि भ्वादिप्रभृतिगणेषुपठितत्वात्तथापि योगरूढ़त्वेन प्रातिपदिकपाठा एव गणपाठनाम्ना व्यवहृतः। गण सङ्ख्याने धातोः निष्पन्नोऽयं गणशब्दः सङ्ख्येयशब्दबोधकः। गण समूह समुदायेषुअयमेव भेदो यद्गणे पौर्वापर्यस्य कोऽपि विशिष्टक्रमो वर्तते समूहे वा समुदायेनैव। एवमेव क्रमेण पठितानां शब्दानां पाठ एव गणपाठ इति निगदितः।

पाणिनीयगणपाठे षट्पंचाशदधिकद्विशतगणाः पठिताः विद्यन्ते। पाणिनीय गणपाठस्य अनेके व्याख्यातारः सन्ति तेषु पाणिनिर्नाम पारायणकारः, क्षीरस्वामी, गणपाठवृत्तिकारः पुरूषोत्तमदेवनारायणः, पञ्चाननयज्ञेश्वरभट्टप्रभृतयो नामत प्रोच्यन्ते। तत्र भगवान् पाणिनिः


© Copyright @ Authors

ISSN: 0976-5301
Peer Reviewed & Refereed Journal (IF: 7.85)
Journal Website www.coherencejournal.in

सूत्रउपदेशगणपाठं निगदितवान्। पाणिनीयगणपाठः स्वर वैदिकप्रक्रियातिरिक्तः सर्वा एवोद्धृतस्तत्र अस्य व्याख्याकाराः गङ्गाधर-गोवर्धन-बालकृष्णप्रभृतयो विद्यन्ते।

**3. परिभाषापाठः-** परिसोपसर्गपूर्वकं भाष् धातोः अच् ततष्टाप् प्रत्ययेन परिभाषा शब्दो व्युत्पद्यते। परितः सर्वतो भाष्यन्ते अनया याभिः ताः परिभाषा। इयं व्याकरणशास्त्रस्य अपरिहार्यमङ्गमस्ति। परिभाषा अनियमे नियमकारिणी भवति। सा च त्रिधा सूत्ररूपा, सूत्रज्ञापिता न्यायसिद्धा च। त्रिधा अपि द्विविधा लिङ्गवती विध्यङ्गशेषभूता च। एकदेशस्थिताऽपि समग्रतया समग्रशास्त्र-प्रकाशिका लिङ्गवती आवश्यक स्थले आवश्यकस्थाने तत्तद्विध्यङ्गरूपा विध्यङ्गशेषभूतेति-कथितञ्च–

**एकस्थः सविता देवो यथा विश्वप्रकाशकः।**

**तथालिङ्गवतीशास्त्रमेकस्यापि प्रदीपयेत्॥**(2)

**एकाऽपि पुंश्चली पुंसां यथैकैकं प्रभाति च।**

**विध्यङ्गशेषभूता तद्विधिं प्रत्यनुगच्छति॥**

इति तच्च “पाणिनीयशास्त्रे यथोद्देशं संज्ञापरिभाषां कार्यकालं संज्ञापरिभाषम्” इति वदन्ति। सामान्यतः चतुर्विधा परिभाषा- सूत्ररूपा सूत्रज्ञापिता न्यायसिद्धा वाचनिका च। तत्र सूत्र- रूपा हि सूत्ररूपेण शब्दानुशासने सम्बद्धा। यथा षष्ठी स्थाने योगा, अन्तादिवच्च, विप्रतिषेधे परं कार्यम् इत्यादीनि। द्वितीया सूत्रेण ज्ञापिता यथा- **“व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्”।** इति लौकिकन्यायानुकूलान्यायसिद्धा। यथा- “गौणमुख्ययोर्मुख्ये कार्यसम्प्रतयः” वाचनिका च आचार्या-प्रभृतिविशेषसिद्धा।

**4. लिङ्गानुशासनम्-** लिङ्गं शब्दमाश्रित्य प्रवर्तते संस्कृतभाषायाम्। यथा- पत्नीवाचकः दारशब्दः पुंसि भवति एवञ्च कलत्र शब्दः क्लीवेऽपि। सुहृच्छब्दो नपुंसके अमित्रशब्दश्च पुंसि भवति। एतेनैव तत्र लिङ्गं नाम शब्दस्याविभाज्यमङ्गम्। अतः शब्दानुशासनस्यापरिहार्यमङ्गेव। एतदेव सर्वैरेव शब्दानुशासनप्रवक्तृभिः स्वस्वतन्त्रसम्बन्धं लिङ्गानुशासनमपि निगदितमेव। कतिपयैः शब्दानुशासनेन-सम्बद्धैराचार्यप्रवरैः लिङ्गानुशासनविषये ग्रन्थरत्नान्यपि विरचितानि सन्ति।

शान्तनु-व्याडि- पाणिनयः शब्दानुशासनसम्बद्धलिङ्गानुशासनप्रवक्तारः विद्यते, वररूचि-हर्षवर्धनवामनाश्च केवलं लिङ्गानुशासनप्रवक्तारः सन्ति। पाणिनेः प्राक् लिङ्गानुशासनप्रवक्तृषु शान्तनुः स्वातन्त्रसम्बद्धलिङ्गानुशासनं समुल्लिखितवान् इति विविधग्रन्थैः ज्ञायते।

आचार्य-व्याडेरपि लिङ्गानुशासनं प्रसिद्धम्। परन्तु तस्य ग्रन्थरत्नं नैवोपलब्धम्। परञ्चास्य यत्किञ्चिदेवांशं विविधग्रन्थेभ्यः ज्ञातुं शक्यते। यथोक्तं वामनेन- “व्याडिप्रणीतमथवाररूचं स चान्द्र……….”। एवमेव हर्षवर्धनेन-

**व्याडेः शङ्करचन्द्रयोर्वररुचे-विद्यानिधेः पाणिनेः।**

**सूक्तान् लिङ्गविधीन् विचार्य सुगमं श्रीवर्धनस्यात्मजः॥**


© Copyright @ Authors

ISSN: 0976-5301
Peer Reviewed & Refereed Journal (IF: 7.85)
Journal Website www.coherencejournal.in

इति तेषां लिङ्गानुशासनसुबद्धं बृहच्चासीदिति वामनस्य "पूर्वाचार्यैर्व्याडिप्रमुखै–र्लिङ्गानुशासन-सूत्रेषूक्तं ग्रन्थविस्तरेण च" इति वचनेन ज्ञायते। पाणिन्युक्तमेव लिङ्गानुशासनं सम्प्रति समुपलभ्यते आर्षग्रन्थावशिष्टत्वेन। पाणिनेः लिङ्गानुशासनत्वे केचन निष्प्रमाणं शङ्कां समुपस्थापयन्ति, किन्तु "असलङ्गे युष्मदस्मदी" इति महाभाष्य-समुद्धरणात् अप्सुमनः समासिकतावर्षाणां बहुत्वञ्चेति पाणिनीयत्वं स्पष्टमेव। तस्य हि लिङ्गम् इति प्रथमं सूत्रम्।

भगवता पाणिनिना हि व्याकरणे लिङ्गमाधृत्यानेकानि कार्याणि निर्दिष्टानि सन्ति। यथा- "स्वमोर्नपुंसकात्"[(3)], "नपुंसकाच्च"[(4)], "नपुंसकस्य झलचः"[(5)], "आङोनास्त्रियाम्"[(6)], "तस्माच्छसो न पुंसि"[(7)] इत्यादि। यदाऽऽचार्येन एतादृशानि सूत्राणि उपदिष्टानि तदा शिष्यै-रवश्यमेव पृष्टं यत् को विधिः लिङ्गज्ञानाय। तदा ह्याचार्यो लिङ्गानुशासनमुपदिष्टवान् अन्यच्च शिष्यैः सङ्गृहीतं परम्परया प्रचलितञ्च। पाणिनीयलिङ्गानुशासनं सूत्रबद्धमस्ति। तस्य व्याख्यातारः अनेके आचार्याः सन्ति। तादृशेषु लिङ्गानुशासनव्याख्यातृषु भट्टोत्पल-रामचन्द्र-भट्टोजी नारायण भट्ट-रामानन्द-नारायण-तारानाथ प्रभृतयः समुल्लेखनीयाः सन्ति।

**5. उणादिसूत्राणि**- उणादिसूत्राणां किमुपादेयत्वं तेषां पाणिनीयत्वविषये च पण्डितप्रवरेषु मतवैभिन्यं दृश्यते। केचिदुणादिसूत्राणि पाणिनीयानि मन्यन्ते। केचिदपाणिनीयानीति। अन्य शाब्दिकइव महर्षि-पाणिनिरपि सर्वान्व शबदान्यौगिकान्स्वीकारोति। कामं तेषां यौगिकत्वं कुत्रचित् अज्ञेयमपि स्यात्। तादृशाह्यत्युत्पन्ना एव शब्दा मताः। येषां शब्दानां स्पष्टं यौगिकत्वं ते शब्दानुशासने व्याख्याताः। येषाञ्च यौगिकत्वमतिक्लिष्टं तेषां सिद्धार्थमुणादि सूत्राण्युक्तानि। तानि च "उणादयो बहुलम्"[(8)] इति सूत्रव्याख्यावसरे के च ते उणादयः? इति शिष्यैः पृष्ट आचार्यः पञ्चपादी समुद्घाटितवान्, यस्याः सुव्यवस्थितं स्वरूपमेव दशपादी वर्तते। पञ्चपादीदशपाद्योरयमेव भेदो विद्यते यत् पञ्चपादी पञ्चसु पादेषु विभक्ता 759 सङ्ख्यकसूत्रात्मिका। दशपादी तु दशसु पादेषु विभक्ता। विभक्तास्तत्र पादक्रमेण- 177, 13, 71, 10, 64, 84, 47, 132, 107, 22 इति कृत्वा 727 सूत्राणि भवन्ति। तत्र प्रथमद्वितीयपादयोरजन्त-प्रत्ययविधानं तृतीय-पादे कवर्गान्त-प्रत्ययानां, चतुर्थे-चवर्गान्तानां, पंचमे टवर्गान्तानां षष्ठे- तवर्गान्तानां, सप्तमे पवर्गान्तानां, अष्टमे- यरलवान्तानां, नवमेशषसहान्तानां प्रत्ययानां विधानं, दशमे- प्रकीर्णशब्दानां विधानमस्ति।

तत्र सुव्यवस्थितरूपेण पञ्चापाद्यां प्रत्ययानां विधानं न विद्यते। तेन पञ्चपाद्यां व्यवस्थितपाठ एव दशपादी। दशपाद्यां कानिचित् सूत्राणि त्यक्तानि कानिचित् नवीनानि स्वीकृतानि, अपिच वैयाकरणेषु उभय एव पाठः समादृतो दृश्यते मुनिप्रोक्तत्वेन। कैयटवासुदेवेत्यादि आचार्याः यद्यपि उणादिं शाकटायनेनोक्तं स्वीकुर्वन्ति तथापि नारायणभट्टप्रभृतयस्तु पाणिनीयमेव मन्यन्ते। नारायणभट्टः प्रक्रियासर्वस्वे उणादिस्थं "मुकुर दुर्दुरौ" इति सूत्रव्याख्यानावसरे समुल्लिखति-

**अकारं मुकुरस्यादि उकारं दर्दुरस्य च ।**

**बभाण पाणिनिस्तौ तु व्यत्यभेनाह भोजराट्॥**[(9)]


© Copyright @ Authors

अत उणादिपाठः पाणिनीयव्याकरणस्यापरिहार्यत्वेन व्याकरणस्य पञ्चाङ्गेषु स्थानं रक्षति। इत्थं प्रकारेण सर्वाङ्गपूर्णम्। धातुपाठः, प्रातिपदिकपाठः, परिभाषापाठः, लिङ्गानुशासनम्, उणादिसूत्रपाठश्चेति पंचविध-खिलपाठसमायुक्तं पाणिनीयशब्दानुशासनं सर्वेष्वन्यतमम् इति।

**(ख) तत्र धातुपाठस्य महत्त्वम्**

"अपदं न प्रयुञ्जीत" इति भाष्यदिशा प्रयोगकरणाय पदनिर्माणमावश्यकम्, तत्र पाणिनि सूत्रदिशा द्विविधमेव। यथा- **"सुप्तिङन्तं पदम्"**(10) तत्र सुबन्तं तिङन्तं च पदसञ्ज्ञं भवति।

यद्यपि पदविभाजनविषये शास्त्रेकारेषु कैतक्यां न दृश्यते तद्यथा यास्केनोक्तम्- **"चत्वारि पदजातानि-नामाख्यातोपसर्गाः निपाताश्च"**(11) केचिद् वैयाकरणा अपि चत्वारि पदानि मन्यन्ते- **"नामाख्यातोपसर्गाः निपाताश्चेतिः वैयाकरणाः"**(12) महाभाष्यकारः महाभाष्ये चत्वारि इति प्रतीकस्य व्याख्याने एवं कथयति- **"चत्वारिपदजातानि नामाख्यातोपसर्गाः निपाताश्च"**(13) व्याकरणशास्त्रस्येतिहासकारानुसारेण त्रैविध्यं पदत्वमपि युक्तिसङ्गतम्, तत्र "सुबन्तं तिङ्क्तमव्ययश्च"(14) तेन नामशब्दस्यापि त्रिधा विभागः कृतः- "रूढो यौगिकः योगरुढश्च" तद् दृष्ट्याऽन्यो विभागोऽपि दृश्यते, यस्यानुमोदनं भाष्यकारेणापि कृतम्- **"चतुष्टयी शब्दानां प्रवृत्तिः जातिशब्दाः गुणशब्दाः, क्रियाशब्दाः यदृच्छाशब्दाश्च।"** केचित् च कर्मप्रवचनीयानां शब्दानामपि पदत्वमामनन्ति। अन्येविद्वांसः गतिसंज्ञकानां पृथक् सत्तां स्वीकृत्य पदस्य षड्विभागान् आमनन्ति। वस्तुतः कर्मप्रवचनीयानां गतिसंज्ञकानाञ्च अन्तर्भावः निपातेषूपसर्गेषु च भवति। अतः पृथक गणनाया आवश्यकता नास्ति। निरुक्तस्य दुर्गवृत्तौ लिखितमस्ति "नापि पञ्च षड्डा जातिकर्मप्रवचनीयभेदेनेति"(15) महर्षिपाणिनेः पदस्य द्वैविध्यत्वस्वीकारे हेतुर्विद्यते यत्-तिङतातिरिक्ताः सर्वेऽपि शब्दाः सुबन्ताः सन्ति, यतो हि उपसर्ग-कर्मप्रवचनीयानां निपातेस्वन्तर्भावो जायते, निपातानाञ्चाव्ययेषु। एवञ्च स्वरादिनिपाताना-मव्ययसंज्ञा भवति। **"स्वारादिनिपातमव्ययम्"**(16) तत्पश्चात् **"अव्ययादाप्सुपः"**(17) सूत्रेण सुपो लुग् भवति। अतो द्वैविध्यस्वीकारे न कापि हानिः।

"अर्थः पदमैन्द्राणामिति" दिशा ऐन्द्रादि कतिपयप्राचीनव्याकरणप्रवक्तारः कथयन्ति यत् सर्वे शब्दाः अर्थवन्तः तेनैकविधत्वं पदम्।(18) एवंचात्र बहुविधानि मतान्यवलोक्यन्ते।

वैयाकरणाः स्व-स्व शब्दानुशासनैः सम्बद्धधातूनां सङग्रहः खिलपाठे कृतवन्तः। तदेव खिलपाठः वैयाकरणनिकाये धातुपाठत्वेन व्यवहृतः। धातुपाठस्यानेके प्रवक्तारः सन्ति। तद्यथा- भागुरि-शाकटायन- आपिशलि-शाकटायन-पाणिन्यादयश्च। तेषु पाणिनीयधातुपाठः अन्यतमः। भाष्यकारपतञ्जलिः पदमञ्जरीकारहरदत्तभृतीनाम् आचार्याणां वचनं पाणिनीयधातुपाठस्य महत्त्वं सर्वातिशयं स्वीकारोति। व्याकरणस्य पञ्चाङ्गेष्वपि धातुपाठः विद्यते। तद्यथा- अस्त्यत्र कश्चित् प्राचीनश्लोकः-

**अष्टकं गणपाठश्च धातुपाठस्तथैव च।**

**लिङ्गानुशासनं शिक्षा पाणिनीया अमी क्रमात्॥**


© Copyright @ Authors

ISSN: 0976-5301
Peer Reviewed & Refereed Journal (IF: 7.85)
Journal Website www.coherencejournal.in

तत्रापि धातुपाठस्य महत्त्वं सर्वातिशयं तिष्ठति उद्धृतं परमलघुमञ्जूषायाम्- **"धातुः सकलशब्दमूलभूतः"**[19] अतएव नागेशेनोक्तम्- **"सकलशब्दमूलभूतत्त्वाद् धात्वर्थो निरुप्यते"**[20] धातुपदेन क्रियावाचिनो भ्वादिधातव एव गृह्यन्ते।

उक्तञ्च पाणिनिना "भूवादयो धातवः"[21] क्रियैव भावशब्देनावबोध्यते। उक्तञ्च निरुक्तकारेण- "भाव प्रधानमाख्यातम्" इत्यादि वाक्यानि धातुपाठस्य प्राधान्यं स्वीकुर्वन्ति। शाकटायनस्य मतानुसारेणापि सर्वाणि नामानि आख्यातजानी धातुजानि सन्ति, तेनापि धातोः महत्त्वं प्रतिपादितं भवति। यत्किञ्चिदपि व्याकरणं धातुपाठेन विना नैव समग्रतां भजते।

**निष्कर्षः**

उपर्युक्तविवेचनस्य आधारेण निष्कर्षतया वक्तुं शक्यते यत् व्याकरणशास्त्रस्य पञ्चाङ्गता पाणिनीयव्याकरणपरम्परायाः एकं विशिष्टं वैशिष्ट्यम् अस्ति। सूत्रपाठः, धातुपाठः, गणपाठः, उणादिसूत्राणि तथा लिङ्गानुशासनम्-एतानि पञ्चाङ्गानि परस्परपूरकत्वेन कार्यं कुर्वन्ति तथा व्याकरणशास्त्रस्य पूर्णतां साधयन्ति। एतेषु पञ्चाङ्गेषु धातुपाठस्य महत्त्वं सर्वाधिकं प्रमुखं दृश्यते, यतः धातवः एव शब्दनिर्माणस्य मूलाधाराः भवन्ति। धातुपाठज्ञानं विना न रूपसिद्धिः सम्यक् ज्ञायते, न च प्रत्ययविधानस्य प्रयोजनम् अवगन्तुं शक्यते। धातवः भाषायाः क्रियाशीलतां, अर्थवैविध्यं तथा शब्दसम्पदं च प्रकाशयन्ति। महर्षिपाणिनिना प्रतिपादिते व्याकरणतन्त्रे धातुपाठः अष्टाध्याय्याः अनिवार्यसहचरः अस्ति। सः शब्दव्युत्पत्तेः, अर्थनिर्णयस्य, रूपनिर्माणस्य तथा शास्त्रीयव्याख्यानस्य प्रमुखं साधनम् अस्ति। संस्कृतसाहित्यस्य, वेदवाङ्गयस्य तथा भारतीयज्ञानपरम्परायाः सम्यगवबोधनाय धातुपाठाध्ययनम् अत्यावश्यकम् अस्ति।

अतः निःसंशयं प्रतिपादयितुं शक्यते यत् व्याकरणस्य पञ्चाङ्गेषु धातुपाठः केन्द्रस्थानीयं महत्त्वं धारयति। सः व्याकरणशास्त्रस्य जीवनरेखा, शब्दनिर्माणस्य मूलस्रोतः तथा संस्कृतभाषायाः वैज्ञानिकसंरचनायाः आधारस्तम्भः इति मन्यते। अतएव धातुपाठस्य अध्ययनं व्याकरणविद्यायाः पूर्णज्ञानप्राप्तये अनिवार्यम् अस्ति।

**संदर्भ-सूची-**

1. व्याकरणशास्त्र का इतिहास-19/250
2. परिभाषेन्दु शेखर
3. अष्टाध्यायी-7/1/23
4. अष्टाध्यायी-7/1/19
5. अष्टाध्यायी-7/1/72
6. अष्टाध्यायी-7/1/120
7. अष्टाध्यायी-6/1/103
8. अष्टाध्यायी-3/3/1


© Copyright @ Authors

9. प्रक्रियासर्वस्व-नारायणभट्ट।
10. अष्टाध्यायी-1/4/214
11. निरुक्त-1/1
12. निरुक्त-1/1
13. महाभाष्य-अ॰-1,प॰-1, आ॰-1
14. व्याकरण शास्त्र का इतिहास द्वि॰ भाग, पृ.- 09
15. निरुक्त दुर्गवृत्ति-1/1, पृ.-10 आनन्द मिश्र, पूना
16. अष्टाध्यायी-1/1/37
17. अष्टाध्यायी-2/4/82
18. सं॰ व्याकरण शास्त्र का इतिहास, भाग-2, पृ.- 9
19. परमलघुमञ्जूषा धात्वर्थनिर्णय
20. परमलघुमञ्जूषा धा॰ निर्णय प्रकरणम्
21. अष्टाध्यायी-1/3/1


© Copyright @ Authors